पञ्चमः पाठः
५

गीतामृतम्

(विसर्ग-सन्धिः)

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।१ ।।

क्रोधाद् भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।२ ।।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।३ ।।

यदा यदा हि धर्मस्य, ग्लानिर्भवति भारत!
अभ्युत्थानमधर्मस्य, तदात्मानं सृजाम्यहम् ।।४ ।।

परित्राणाय साधूनां, विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय, सम्भवामि युगे युगे ।।५।।

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।।६।।

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुपत्वं मार्दवः ह्रीरचापलम् ।।७ ।।

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं देवीमभिजातस्य भारत! ।।८।।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।९।।

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ।।१०।।

पदच्छेदः

कर्मण्येवाधिकारस्ते	=	कर्मणि + एव + अधिकारः + ते
कर्मफलहेतुर्भूः	=	कर्मफलहेतुः + भूः
सङ्गोऽस्त्वकर्मणि	=	सङ्गः + अस्तु + अकर्मणि
यद्यदाचरति	=	यत् + यत् + आचरति
यत्प्रमाणम्	=	यत् + प्रमाणम्
लोकस्तदनुवर्तते	=	लोकः + तत् + अनुवर्तते
ग्लानिर्भवति	=	ग्लानिः + भवति
अभ्युत्थानमधर्मस्य	=	अभि + उत्थानम् + अधर्मस्य
तदात्मानं	=	तदा + आत्मानं
सृजाम्यहम्	=	सृजामि + अहम्
धर्मसंस्थापनार्थाय	=	धर्मसंस्थापन + अर्थाय
श्रद्धावाँल्लभते	=	श्रद्धावान् + लभते
संयतेन्द्रियः	=	संयत + इन्द्रियः
शान्तिमचिरेणाधिगच्छति	=	शान्तिम् + अचिरेण + अधिगच्छति

सत्यमक्रोधस्त्यागः	=	सत्यम् + अक्रोधः + त्यागः
शान्तिरपैशुनम्	=	शान्तिः + अपैशुनम्
भूतेष्वलोलुपत्वं	=	भूतेषु + अलोलुपत्वं
ह्रीरचापलम्	=	ह्रीः+अचापलम्
शौचमद्रोहोनातिमानिता	=	शौचम् + अद्रोहः + न + अतिमानिता
दैवीमभिजातस्य	=	दैवीम् + अभिजातस्य
अनुद्वेगकरम्	=	अन् + उद्वेगकरम्
स्वाध्यायाभ्यसनं	=	स्वाध्याय + अभ्यसनं
चैव	=	च + एव
मौनमात्मविनिग्रहः	=	मौनम् + आत्मविनिग्रहः
भावसंशुद्धिरित्येतत्तपो	=	भावसंशुद्धिः + इति + एतत् + तपो
मानसमुच्यते	=	मानसम् + उच्यते

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
हेतुः	कारणम्	कारण
सम्मोहः	मूढता	मूर्खता
विभ्रमः	भ्रान्तिः	भटकाव
ग्लानिः	हानिः	हानि
अभ्युत्थानमधर्मस्य	अधर्मस्य विकासम्	अधर्म का बढ़ना
परित्राणाय	रक्षणाय	रक्षा करने के लिए
आत्मानम्	स्वयमेव	अपने आपको
संयतेन्द्रियः	संयतानि इन्द्रियाणि यस्य सः	इन्द्रियों को वश में रखने वाला
अपैशुनम्	न पैशुनम्	चुगली न करना
मार्दवं	मृदुता	कोमलता
ह्रीः	लज्जा	लज्जा
अचापलम्	स्थिरता	चंचलता का अभाव

धृतिः	धैर्यम्	धीरज
दैवीम्	अलौकिकम्	अलौकिक
अभिजातस्य	कुलीनस्य	उच्च कुलोत्पन्न पुरुष के
अनुद्वेगकरं	येन क्रोधं न जायते	क्रोध पैदा नहीं करने वाले
वाङ्मयं	वाग्युक्तम्	वाणी का
मनः प्रसादः	हर्षः	मन की प्रसन्नता
सौम्यत्वं	सारल्यम्	सरलता
आत्मविनिग्रहः	आत्मसंयमः	स्वयं संयम करना
भावसंशुद्धि	भावनाशुद्धि	भावनाओं की शुद्धता

अभ्यासः

मौखिकप्रश्नाः

१. उच्चारणं कुरुत -

परित्राणाय	क्रोधात्	भ्रंशाद्	विभ्रमः
बुद्धिनाशो	यद्यदाचरित	श्रेष्ठः	सृजाम्यहम्
सङ्गोऽस्त्वकर्मणि	विद्यते	श्रद्धावाँल्लभते	पैशुनम्
ह्रीः	धृतिः	वाङ्मयम्	संशुद्धिः।

२. एकपदेन उत्तरं वदत -

(क) क्रोधाद् किं भवति ?

(ख) ज्ञानं कः लभते ?

(ग) अस्माकं अधिकारः कुत्र अस्ति ?

(घ) केषां परित्राणाय ईश्वरः सम्भवति ?

लिखितप्रश्नाः

१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -

(क) परमात्मा आत्मानं कदा सृजति ?

(ख) वाङ्मयः तपः किम् अस्ति ?

(ग) मौनं कीदृशं तपः उच्यते ?

(घ) कः लभते ज्ञानम् ?

२. उचितपदप्रयोगेण रिक्तस्थानानि पूरयत -

(क) ते अधिकारः अस्ति .... । (कर्मणि/अकर्मणि)

(ख) ईश्वरः साधूनां .... युगे युगे सम्भवति। (विनाशाय/परित्राणाय)

(ग) .... भवति सम्मोहः। (श्रद्धया/क्रोधात्)

(घ) यद्यदाचरति .... तत्तदेवेतरो जनः। (कनिष्ठ/श्रेष्ठः)

३. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत -

उदाहणम् - <u>कर्मणि</u> एव ते अधिकारः।

प्रश्नः - कस्मिन्नेव ते अधिकारः ?

(क) <u>क्रोधाद्</u> भवति सम्मोहः।

(ख) यद्यदाचरति <u>श्रेष्ठः</u> जनः लोकः तदनुवर्तते।

(ग) <u>धर्मस्य</u> ग्लानिर्भवति।

(घ) न हि <u>ज्ञानेन</u> सदृशं पवित्रम् ।

(ङ) मनः प्रसादः <u>सौम्यत्वं तयोः</u> मानसमुच्यते।

४. 'क' खण्डं 'ख' खण्डेन सह उचितेन पदेन योजयत् -

'क' खण्डम्		'ख' खण्डम्
(क) परित्राणाय	-	सदृशं पवित्रम्
(ख) न हि ज्ञानेन	-	ज्ञानम्
(ग) श्रद्धावाँल्लभते	-	साधूनाम्
(घ) मनः प्रसादः सौम्यत्वं	-	मानसमुच्यते
(ङ) भावसंसिद्धिरित्येत्तपो	-	मौनमात्मविनिग्रहः
(च) क्रोधात् भवति	-	सम्भवामि युगे युगे
(छ) धर्मसंस्थापनार्थाय	-	सम्मोहः

५. निम्नाङ्क्तिपदेषु सन्धिविच्छेदं कुरुत -

(क) कर्मण्येव = ... + ...

(ख) क्रोधाद् भवति = ... + ...

(ग) ग्लानिर्भवति = ... + ...

(घ) अचिरेणाधिगच्छति = ... + ...

(ङ) शान्तिरपैशुनम् = ... + ...

६. अधोलिखितपदेषु शब्दं विभक्तिवचनं च लिखत -

पदम्	शब्दः	विभक्तिः	वचनम्
(क) साधूनाम्	....	....	....
(ख) फलेषु	....	....	....
(ग) विनाशाय	....	....	....
(घ) ज्ञानेन	....	....	....
(ङ) युगे	....	....	....
(च) अहिंसा	....	....	....
(छ) परित्राणाय	....	....	....

योग्यता-विस्तारः

(क) पाठपरिचयः -

भारतीयसंस्कृतेः प्रसिद्धौ द्वौ उपजीव्यकाव्यग्रन्थौ स्तः - 1. रामायणम् 2 महाभारतं च। श्रीमद्भगवद् गीता महाभारतस्य भीष्मपर्वणः अंशोऽस्ति। अस्मिन् ग्रन्थे श्रीकृष्णस्य कर्त्तव्यविमूढाय अर्जुनाय प्रदत्ताः दिव्यसन्देशाः सन्ति। ग्रन्थोऽयम् न केवलं अर्जुनाय अपितु मानवमात्राय कल्याणकारी अस्ति। गीतायाम् अष्टादश अध्यायाः सप्तशतकाः श्लोकाः सन्ति।

(ख) भाषाविस्तारः

विसर्ग-सन्धिः

१. **विसर्गस्य पश्चात् 'च' अथवा 'छ' भवति तदा विसर्गस्य स्थाने 'श्' आदेश भवति।**

यथा –

रामः	+	चलति	=	रामश्चलति	(विसर्गस्य श् आदेशः)
निः	+	छल	=	निश्छलः	(विसर्गस्य श् आदेशः)

२. **विसर्गस्य पश्चात् 'त्' अथवा 'थ्' वर्णः भवति तदा विसर्गस्य स्थाने 'स' वर्णः भवति ।**

यथा –

यशः	+	तनोति	=	यशस्तनोति	(विसर्गस्य स् आदेशः)
नमः	+	ते	=	नमस्ते	(विसर्गस्य स् आदेशः)

३. **अकारस्य परे विसर्गः भवति विसर्गस्य परे पुनः अकारः भवति तदा पूर्वस्य अकारविसर्गस्य च स्थाने 'ओ' भवति तथा परे स्थितस्य अकारस्य स्थाने 'ऽ' (अवग्रहः) भवति।**

यथा –

सः	+	अपि	=	सोऽपि	(विसर्गस्यस्थाने 'ओ' एवं अ स्थाने ऽ)
कः	+	अयम्	=	कोऽयम्	(विसर्गस्यस्थाने 'ओ' एवं अ स्थाने ऽ)

४. **विसर्गस्यपूर्वं 'अ' एवं विसर्गस्य पश्चात् अन्य स्वरः भवति तदा विसर्गस्य लोपः भवति।**

यथा –

रामः	+	आगतः	=	राम आगतः	(विसर्गस्य लोपः)
सूर्यः	+	उदेति	=	सूर्य उदेति	(विसर्गस्य लोपः)

५. **विसर्गस्य पूर्व 'अ' एवं पश्चात् वर्गस्य तृतीयः, चतुर्थः, पञ्चमः वर्ण च भवति, तदा 'अ' एवं विसर्गस्य स्थाने 'ओ' भवति।**

यथा –

पयः	+	धरः	=	पयोधरः	(अ एवं विसर्गस्य आदेशः = ओ)
पुरः	+	हितः	=	पुरोहितः	(अ एवं विसर्गस्य आदेशः = ओ)